अत्यग्निष्टोमसंस्थे दशमाहे "अत्यग्निष्टोमोऽविवाच्यं दशमम्" कात्या० १२,३,२१, । "अत्यग्निष्टोमसंस्थमविवाच्यं दशममहर्भवति" कर्क० । "नास्मिन्नहनि केनचित् कस्यचित् विवाच्यमविवाच्यमित्याचक्षते" आश्व० श्रौ० २,१२,१०। अस्मिन्नहनि केनचित् कस्मैचित् कर्त्रे मन्त्रः कर्म्म वा न विवाच्यं नाख्यावव्यमित्यर्थः कुतः ? यस्मादेतदहः अविवाच्यमिति श्रुतौ प्रसिद्धम् परस्परमविवचनीयमेतस्मिन्नहनीत्यविवाच्यमिदमहर्भवति ।

**अविवाद** पु० विरुद्धो वादः कथनं व्यवहारभेदः विरोधस्य अभावे २न०त० । १,विरुद्धवादाभावे ऐक्यमत्ये २अव्यवहारे ३विरोधाभावे च न०ब० ४तच्छून्ये त्रि०। [विवाहसंस्कारे।

**अविवाहित** त्रि० न०त० । विवाहितभिन्ने अनूढ़े अजात-

**अविविक्त** त्रि०न०त० । १एकीभूते २विवेकशून्ये ३अन्योन्यतादात्म्यापन्ने "तप्तायःपिण्डवदविविक्तं सत् तदेव महावाक्यस्य वाच्यार्थो भवति" वेदान्तसा० ।

**अविवेक** पु० न विवेकः भेदकधर्म्मेण ज्ञानम् अभावे न०त० । अन्योन्यतादात्म्यारोपहेतौ १विशेषज्ञानाभावे इति नैयायिकाः। विरोधे न० २अन्योन्यतादात्म्यज्ञानरूपे मिथ्याज्ञाने "तद्योगोऽप्यविवेकात्" सा०सू० । "अयञ्चाविवेकोऽगृहीतासंसर्गकमुभयज्ञानमविद्यास्यत्वाभिषिक्तं विवक्षितः" "बन्धो विपर्ययात्" विपर्ययभेदाः पञ्च" इत्यागामिसूत्रद्वयात् "तस्य हेतुरविद्येति" योगसूत्रेऽप्यविद्याया एव पञ्चपर्व्वरूपाया बुद्धिपुरुषसंयोगहेतुतया वचनाच्चान्यथाख्यात्यनभ्युपगमएव योगतोऽत्र विशेषौचित्यात् । न पुनरविवेकोऽत्राभावमात्रं विवेकप्रागभावो वा मुक्तस्यापि बन्धापत्तेः जीवन्मुक्तस्यापि भाविविवेकव्यक्तिप्रागभावेन धर्म्माधर्म्मोत्पत्तिद्वारा पुनर्बन्धप्रसङ्गाच्च । तथागामिसूत्रस्यध्वान्तदृष्टान्तानुपपत्तेः अभावस्य ध्वान्तवदावरकत्वाभावात् । तथा वृद्धिह्रासावप्यविवेकस्य श्रूयमाणौ नोपपद्येयातामिति । अस्मन्मते च वासनात्मकस्यैवाविवेकस्य संयोगाख्यजन्महेतुतया तमोवदावरकत्ववृद्धिह्रासादिकमञ्जसैवोपपद्यते । "तस्य हेतुरविद्येति" पातञ्जलसूत्रे च भाष्यकारैरविद्याशब्देनाविद्यावीजं व्याख्यातम् ज्ञानस्य संयोगोत्तरकालीनत्वेन संयोगाजनकत्वादिति । अपि च "पुरुषः प्रकृतिस्थो हि भुङ्क्ते" इत्यादिवाक्येष्वभिमानाख्यसंयोगस्यैव प्रकृतिस्थताख्यसंयोगहेतुतावगम्यते । अत एव चाविद्या नाभावोऽपि तु विद्याविरोधिज्ञानान्तरमिति योगभाष्ये व्यासदेवैः प्रयत्नेनावष्टतम् । तस्मादविवेकाविद्ययोस्तुल्ययोगक्षेमतयाऽविवेकस्यापि ज्ञानविशेषत्वमिति सिद्धम् । अयं चाविवेकस्त्रिधा संयोगाख्यजन्महेतुः साक्षात्,धर्माधर्मोत्पत्तिद्वारा, रागादिदृष्टद्वारा च भवति" सां०प्र०भा० । अधिकमविद्याशब्दे दृश्यम् । [शून्ये ।

**अविवेचक** त्रि० न०त० । विवेचकभिन्ने कार्य्याकार्य्यविवेचना-

**अविवेन** त्रि० "वेनतिः कान्तिकर्म्मा" निरु० वि+वेन-अच् न०त० । विगतेच्छभिन्ने इच्छाशीले । "मनसाऽविवेनं तमित् सखायम्" ऋ० ४,२४,६,।"अविवेनमिच्छाविगमशून्यम्" भा० ।

**अविशङ्का** स्त्री विशेषेण शङ्का अभावे न०त०। १विशेषशङ्काभावे । न०ब० २विशङ्कारहिते त्रि० ।

**अविशङ्कित** त्रि० वि+शकि–कर्त्तरि क्त, विशङ्का जाताऽस्य इतच् वा न०त०।१विशङ्कारहिते। "विदध्यादविशङ्कितः" स्मृतिः । २अजातशङ्के च ।

**अविशस्तृ** त्रि० न विशस्ता विशसने कुशलः । यज्ञियपशुहिंसनेऽनिपुणे शमितरि "मा ते त्वष्टा रविशस्तातिहाय" ऋ०१,१६२,२० ।

**अविशुद्ध** त्रि० विरोधे न०त० । विशुद्धभिन्ने सदोषे ।

**अविशुद्धि** स्त्री विरोधे न०त० । शुद्धिविपरीते दोषे "सह्यविशुद्धिक्षयातिशययुक्तः" सां० का० । अविशुद्धिर्हिंसादोषसाधनता यथोक्तम् "अविशुद्धिः सोमादियागस्य पशुवीजादिवधसाधनता यथाह स्म भगवान् पञ्चशिखाचार्य्यः "स्वल्पसङ्करः सपरिहारः सप्रत्यवमर्षः" इति । स्वल्पसङ्करः ज्योतिष्टोमादिजन्मनः प्राधानापूर्वस्य स्वल्पेन पशुहिंसादिजन्मनानर्थहेतुना अपूर्वेण सङ्करः। सपरिहारः कियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः । अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म्मविपाकसमये च पच्यते तथापि यावदसावनर्थं सूते तावत् सप्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति। मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम् । न च "मा हिंस्यात् सर्व्वाभूतानीति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेतेत्यनेन" बाध्यत इति युक्तं विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते । न चेहास्ति कश्चित् विरोधः भिन्नविषयत्वात् । तथा हि "मा हिंस्यादिति" निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वक्रत्वर्थत्वमपि 'अग्नीषोमीयं पशुमालभेत"इत्यनेन तु पशुहिंसायाः क्रत्वर्थत्वमुच्यते न त्वनर्थहेतुत्वाभावस्तथा सति वाक्यभेदप्रसङ्गात् न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः । हिंसा